









दशमः पाठः १०


# संख्याज्ञानम्

## ( संख्यावाची/क्रमवाची )


| | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| १ <br> 1 |  <br> एक: बालक: । |  <br> एका बालिका । |  <br> एकं पुष्पम् । |
| २ <br> 2 |  <br> द्वौ मयूरौ । |  <br> द्वे माले । |  <br> द्वे विमाने । |
| ३ <br> 3 |  <br> त्रय: सिंहा: । |  <br> तिस्र: नौका: । |  <br> त्रीणि चक्राणि । |
| ४ <br> 4 |  <br> चत्वार: गजा: । |  <br> चतस्र: अजा: । |  <br> चत्वारि कमलानि । |
| ५ <br> 5 |  <br> पञ्च वृक्षा: । |  <br> पञ्च द्विचक्रिका: । |  <br> पञ्च गृहाणि । |




६
6
षट् शुकाः।




७
7
सप्त वीणाः।




८
8
अष्ट फलानि।




९
9
नव अश्वाः।




१०
10
दश चटकाः।




११
11
एकादश कपोताः।




१२
12
द्वादश पर्णानि।




१३
13
त्रयोदश उष्ट्राः।




१४ 14 चतुर्दश दीपकाः ।




१५ 15 पञ्चदश पुस्तकानि ।




१६ 16 षोडश सिक्थवर्तिकाः ।




१७ 17 सप्तदश चमसाः ।



१८ 18 अष्टादश घटिकाः ।




१९ 19 नवदश पिपीलिकाः ।



२० 20 विंशतिः कुञ्चिकाः ।

**पश्यत, पठत अवगच्छत च-**



एतत् उद्यानम्। अत्र एकः वटवृक्षः अस्ति। वटवृक्षस्य उपरि द्वौ वानरौ उपविशतः। तत्र एव द्वे चटके स्तः, ते मधुरं कूजतः। त्रयः शुकाः अपि तत्र सन्ति। वृक्षस्य अधः चत्वारः मयूराः नृत्यन्ति। समीपे एव चतस्रः बालिकाः क्रीडन्ति। पञ्च महिलाः वार्तालापं कुर्वन्ति। षट् पुरुषाः भ्रमणं कुर्वन्ति। कोणे एकः चत्वरः अस्ति। तत्र सप्त कपोताः अन्नकणान् खादन्ति। सम्मुखं पुष्पपादपानां पङ्क्तिः अस्ति। तत्र अष्ट पुष्पाणि विकसन्ति। उद्यानस्य त्रीणि द्वाराणि सन्ति। बहिर्भागे नव द्विचक्रिकाः सन्ति। उद्यानस्य समीपे एकः सरोवरः अस्ति। तत्र दश कमलानि विकसन्ति। उद्यानस्य दृश्यं मनोहरम् अस्ति।

## आगच्छन्तु वयं रेलयानं पश्यामः –




| | | |
|---|---|---|
| रेलयाने | प्रथमः | बालकः पवनः। |
| रेलयाने | द्वितीयः | बालकः मनीषः। |
| रेलयाने | तृतीयः | बालकः शङ्करः। |
| रेलयाने | चतुर्थः | बालकः अनूपः। |
| रेलयाने | पञ्चमः | बालकः रहीमः। |
| रेलयाने | षष्ठः | बालकः अमितः। |
| रेलयाने | सप्तमः | बालकः लोकेशः। |
| रेलयाने | अष्टमः | बालकः तरुणः। |
| रेलयाने | नवमः | बालकः अनिलः। |
| रेलयाने | दशमः | बालकः मुरलीधरः। |


## अभ्यासः


**१. उच्चारणं कुरुत –**


| | | | |
|---|---|---|---|
| द्वे, | द्वौ, | तिस्रः, | त्रीणि, |
| चत्वारि, | षट्, | चतस्रः, | त्रयोदश, |
| षोडश, | विंशतिः, | पङ्क्तिः, | बहिर्भागे । |


**२. मञ्जूषायां विद्यमानानां चित्राणां गणनां कृत्वा उचितसङ्ख्यापदं रिक्तस्थाने लिखत –**


यथा –  त्रयः शुकाः।

( क )  ........................... कुञ्चिकाः।

(ख)  .......................... चमसौ।

(ग)  ....................... सिक्थवर्तिका

(घ)  ....................... पर्णानि

(ङ)  ....................... पुष्पाणि

### ३. परस्परं सुमेलयत -

| | |
|---|---|
| द्वे | ९ |
| चत्वारि | २० |
| नव | २ |
| एकादश | १७ |
| त्रयोदश | ४ |
| पञ्चदश | १५ |
| सप्तदश | १३ |
| विंशतिः | ११ |

### ४. कोष्ठकात् उचितं सङ्ख्यापदं चित्वा लिखत -

(क) ............................ व्यजने । ( द्वौ / द्वे )

(ख) ............................ पुस्तकानि । ( त्रयः / तिस्रः / त्रीणि )

(ग) ............................ अध्यापिका । ( एकः / एका / एकम् )

(घ) ............................ उत्पीठिकाः । ( चत्वारः / चत्वारि / चतस्रः )

**५. अधोलिखितसंख्याः संस्कृतशब्देषु लिखत -**

(क) ५ - ........................ (ख) १८ - ........................

(ग) ७ - ........................ (घ) १२ - ........................

(ङ) १० - ........................ (च) ६ - ........................

(छ) १६ - ........................ (ज) १९ - ........................

**६. चित्रं दृष्ट्वा उचितं संख्यापदं लिखित्वा रिक्तस्थानानि पूरयत -**



(क) अत्र ............................ नौके स्तः ।

(ख) अत्र ............................ बालकाः स्नानं कुर्वन्ति।

(ग) अत्र ............................ मीनाः सन्ति।

(घ) अत्र ............................ कमलानि विकसन्ति।

(ङ) अत्र ............................ बकाः सन्ति।

**७. उचितं क्रमवाचकपदानि लिखित्वा रिक्तस्थानानि पूरयत -**

यथा - १. प्रथमः मासः चैत्रः। २. ............... मासः वैशाखः।

३. ............... मासः ज्येष्ठः। ४. ............... मासः आषाढः।

५. ............... मासः श्रावणः। ६. ............... मासः भाद्रपदः।

७. ............... मासः आश्विनः। ८. ............... मासः कार्तिकः।

९. ............... मासः मार्गशीर्षः। १०. ...............मासः पौषः।

११. एकादशः मासः माघः। १२. द्वादशः मासः फाल्गुनः।

## योग्यता-विस्तारः

⇨ एकम्, द्वे, त्रीणि......इत्यादयः संख्यावाचक शब्दाः भवन्ति। गणनाकरणाय एतेषां शब्दानां प्रयोगः भवति।

⇨ प्रथमः, द्वितीयः, तृतीयः ................ इत्यादयः क्रमवाचकशब्दाः भवन्ति। क्रमस्य प्रदर्शनाय एतेषां शब्दानां प्रयोगः भवति।

⇨ **सप्ताहे – सप्त वासराः भवन्ति –**

| | | | |
|---|---|---|---|
| प्रथमः | वासरः | – | रविवासरः। |
| द्वितीयः | वासरः | – | सोमवासरः। |
| तृतीयः | वासरः | – | मङ्गलवासरः। |
| चतुर्थः | वासरः | – | बुधवासरः। |
| पञ्चमः | वासरः | – | गुरुवासरः। |
| षष्ठः | वासरः | – | शुक्रवासरः। |
| सप्तमः | वासरः | – | शनिवासरः। |

## संख्यागीतम्

**एकम् एकम् एकम्, मम हृदयम् एकम्।**
**द्वे द्वे द्वे, मम नेत्रे द्वे।।**

**त्रीणि त्रीणि त्रीणि, बिल्वपत्राणि त्रीणि।**
**चत्वारि चत्वारि चत्वारि, ब्रह्ममुखानि चत्वारि।।**

**पञ्च पञ्च पञ्च, पाण्डवाः सन्ति पञ्च।**
**षट् षट् षट्, कार्तिकेयस्य मस्तकानि षट्।।**

**सप्त सप्त सप्त, वासराः सन्ति सप्त।**
**अष्ट अष्ट अष्ट, देव्याः भुजाः अष्ट।।**

**नव नव नव, ग्रहाः सन्ति नव।**
**दश दश दश, रावणस्य मस्तकानि दश।।**

**अध्यापकाय निर्देशः –**

। अध्यापकः संख्यागीतस्य अभ्यासः सङ्केतैः अभिनयेन च सह छात्रान् कारयेत्।